संस्थाप्य तं विपुलशैलमथोत्तरेण
शैलं सुपार्श्वमपि माषमयं सुवस्त्रम्
पुष्पैश्च हैमवटपादपशेखरन्त-
माकारयेत् कनकधेनुविराजमानम् ॥
माक्षीकभद्रसरसा च वनेन तद्व-
द्रौप्येण भास्वरवता च युतं विधाय ।
होमश्चतुर्भिरथ वेदपुराणविद्भि-
र्दान्तैरनिन्द्यचरिताकृतिभिर्द्विजेन्द्रैः ॥
पूर्व्वेण हस्तमितमत्र विधाय कुण्डं
कार्य्यस्तिलैर्यवघृतेन समित्कुशैश्च ।
रात्रौ च जागरमनुद्धतगीततूर्य्यै-
रावाहनञ्च कथयामि शिलोच्चयानाम् ॥
त्वं सर्व्वदेवगणधामनिधे! विरुद्ध-
मस्मद्गृहेष्वमरपर्व्वत नाशयाशु ।
क्षेमं विधत्स्व कुरु शान्तिमनुत्तमां नः
संपूजितः परमभक्तिमता मया हि ॥
त्वमेव भगवानीशो ब्रह्मा विष्णुर्द्दिवाकरः ।
मूर्त्तामूर्त्तजगद्बीज! त्वं नः पाहि सनातनः ॥
यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मन्दिरम् ।
रुद्रादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे ॥
यस्मादशून्यममरैर्नारीभिश्च शिवस्तव ।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥
एवमभ्यर्च्य तं मेरुं मन्दरञ्चाभिपूजयेत् ।
यस्माच्चैत्ररथेन त्वं भद्राश्वेन विशेषतः ॥
शोभसे मन्दर ! क्षिप्रमतस्तुष्टिकरो भव ॥
यस्माच्चूड़ामणिर्जम्बुद्वीपे त्वं गन्धमादन ! ।
गन्धर्व्ववनशोभावानतः कीर्त्तिर्द्दृढ़ास्तु मे ॥
यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन वा ।
हिरण्मयाश्वत्थशिरस्तस्मात् पुष्टिर्ध्रुवास्तु मे ॥
उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च ।
सुपार्श्व ! राजसे नित्यमतः श्रीरक्षयास्तु मे ॥
एवमामन्त्र्य तान् सर्व्वान् प्रभाते विमले पुनः ।
स्नात्वाथ गुरवे दद्यान्मध्यमं पर्व्वतोत्तमम् ॥
विष्कम्भपर्व्वतान् दद्यादृत्विग्भ्यः क्रमशो मुने ! ॥
गाश्च दद्याच्चतुर्विंशदथवा दश नारद ! ।
शक्तितः सप्त वाष्टौ वा पञ्च दद्यादशक्तिमान् ॥
एकापि गुरवे देया कपिलाथ पयस्विनी ।
पर्व्वतानामशेषाणामेष एव विधिः स्मृतः ॥
त एव पूजने मन्त्रास्त एवोपस्करा मताः ।
ग्रहाणां लोकपालानां ब्रह्मादीनाञ्च सर्व्वदा ॥
स्वमन्त्रेणैव सर्व्वेषु होमः शैलेषु पठ्यते ।
उपवासी भवेन्नित्यमशक्तौ नक्तमिष्यते ।
विधानं सर्व्वशैलानां क्रमशः शृणु नारद ! ॥
दानकाले च ये मन्त्राः पर्व्वतेषु च यत्फलम् ।
अन्नं ब्रह्म यतः प्रोक्तमन्नं प्राणाः प्रकीर्त्तिताः ॥
अन्नाद्भवन्ति भूतानि जगदन्नेन वर्त्तते ।
अन्नमेव ततो लक्ष्मीरन्नमेव जनार्द्दनः ॥
धान्यपर्व्वतरूपेण पाहि तस्मान्नगोत्तम ! ।
अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम् ॥
मन्वन्तरशतं साग्रं देवलोके महीयते ।
अप्सरोगणगन्धर्व्वैराकीर्णेन विराजता ॥
विमानेन दिवः पृष्ठमायाति सुरसेवितः ।
ततः कर्म्मक्षये राज्यमाप्नोतीह न संशयः ॥”
इति मत्स्यपुराणम् ॥

धान्याम्लं, क्ली, (धान्यात् धान्यविकारात् जातं अम्लम् ।) काञ्जिकम् । इत्यमरः ।२।९।३९ ॥
“धान्याम्लं शालिचूर्णानां कोद्रवादिकृतं भवेत् ।
धान्याम्लं धान्ययोनित्वात् प्रीणनं लघु दीपनम् ॥
अरुचौ वातरोगेषु सर्व्वेष्वास्थापने हितम् ॥”
इति भावप्रकाशः ॥
(“धान्याम्लं भेदि तीक्ष्णोष्णं पित्तकृत् स्पर्श-शीतलम् ।
श्रमक्लमहरं रुच्यं दीपनं वस्तिशूलनुत् ।
शस्तमास्थापने हृद्यं लघुवातकफापहम् ॥”
इति वाभटे सूत्रस्थाने पञ्चमेऽध्याये ॥)

धान्यारिः, पुं, (धान्यस्य अरिः ।) मूषिकः । इति राजनिर्घण्टः ॥ त्रि, धान्यस्य शत्रुश्च ॥

धान्योत्तमः, पुं, (धान्येषु उत्तमः ।) शालिधान्यम् । इति राजनिर्घण्टः ॥

धाम, [न्] क्ली, (दधाति गृहस्थादिकं धीयते द्रव्यजातमस्मिन्निति वा । धा+“सर्व्वधातुभ्यो मनिन् ।” उणां ४ । १४४ । इति मनिन् ।) गृहम् । (यथा, मेघदूते । ३५ ।
“भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डेश्वरस्य ॥”) देहः । त्विट् । प्रभावः । इत्यमरः । ३ । ३ । १२३ ॥ (यथा, किराते । २ । ४७ ।
“सहते न जनोऽप्यधःक्रियां
किमु लोकाधिकधाम राजकम् ॥”)
रश्मिः । (यथा, माघे । १ । २ ।
“पतत्यधो धाम विसारि सर्व्वतः
किमेतदित्याकुलमीक्षितं जनैः ॥”)
स्थानम् । (यथा, पञ्चदश्याम् । ७ । २१४ ।
“त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदा-शिवः ॥”)
जन्म । इति मेदिनी । ने, ८० ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ३६ ।
“गुरुर्गुरुतरो धाम सत्यः सत्यपराक्रमः ॥”
“धाम ज्योतिः नारायणः परं ज्योतिरिति मन्त्र-वर्णात् । सर्व्वलोकाश्रमाश्रयत्वात् वा धाम । परं ब्रह्म परं धाम इति श्रुतेः ॥” इति तद्भाष्यम् ॥

धामकः, पुं, माषकपरिमाणम् । इति वैद्यकपरि-भाषा ॥

धामनिधिः, पुं, (धामानि किरणानि निधीयन्ते ऽत्र । नि+धा+किः ।) सूर्य्यः । इति जटाधरः ॥

धामनी, स्त्री, (धमन्येव । धमनी+स्वार्थे अण् । ततो ङीष् ।) धमनी । इति शब्दचन्द्रिका ॥

धामार्गवः पुं, (धाम्नो मार्गं पन्थानं वातीति । वा गतौ+कः ।) अपामार्गः । इत्यमरः ।२।४।८८॥ (रक्तापामार्गोऽयम् । अस्य पर्य्यायो यथा,—
“रक्तोऽन्यो वशिरो वृत्तफलो धामार्गवोऽपि च ।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) घोषकः । इति मेदिनी । वे, ५९ ॥ (अस्य पर्य्यायो यथा,—
“महाकोषातकी प्रोक्ता हस्तिघोषा महाफला ।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पीतघोषा । इति रत्नमाला ॥

धायः, त्रि, (दधाति धारयतीति । धा+“श्याद्व्यधा-स्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च ।” ३ । १ । १४१ । इति णः ।) धारण-कर्त्ता । इति मुग्धबोधव्याकरणम् ॥ (यथा, भट्टिः । ६ । ७९ ।
“ददे दुःखस्य मादृग्भ्यो धायैरामोदमुत्तमम् ॥”)

धायाः, [स्] त्रि, (दधातीति । धा+“वहि-हाधाञ्भ्यश्छन्दसि ।” उणां ४ । २२० । इत्य-सुन् बाहुलकात् युक् ।) धारणकर्त्ता । पोषण-कर्त्ता । यथा, वाजसनेयसंहितायाम् ।१३।१८।
“भूरसि भूमिरस्यदितिरसि विश्वस्य धायाः ॥”

धाय्यः, पुं, (धीयते आश्रियते मङ्गलार्थमिति । धा+कर्म्मणि ण्यत् ततो युक् ।) पुरोहितः । इति मुग्धबोधव्याकरणम् ॥

धाय्या, स्त्री, (धीयतेऽनया समित् । धा+करणे ण्यत् ।) अग्निसमिन्धनार्थं ऋक् । अग्निप्रज्वा-लनमन्त्रः । इत्यमरः । २ । ७ । २२ ॥

धारं, क्ली, (धाराया इदम् । धारा+“तस्येदम् ।” ४ । ३ । १२० । इत्यण् ।) वर्षोद्भवं जलम् । तद्द्विविधम् । गाङ्गम् १ सामुद्रञ्च २ । यथा,—
“यदा स्यादाश्विने मासि सूर्य्यः स्वातीविशाखयोः ।
तदाम्बु जलदैर्मुक्तं गाङ्गमुक्तं मनीषिभिः ॥
अन्यदा मृगशीर्षादिनक्षत्रेषु यदम्बुदैः ।
अभिवृष्टमिदं तोयं सामुद्रमिति संज्ञितम् ॥”
तयोर्गुणाः । यथा,—
“गाङ्गं जलं स्वादु सुशीतलञ्च
रुचिप्रदं पित्तकफापहञ्च ।
निर्दोषमिष्टं लघु तच्च नित्यं
गुणाधिकं व्योम्नि गृहीतमाहुः ॥
सामुद्रसलिलं शीतं कफवातकरं गुरु ।
चित्रायामाश्विने तच्च गुणाढ्यं गाङ्गवद्भवेत् ॥
पतितं भुवि तत्तोयं गाङ्गं सामुद्रमेव वा ।
स्वस्वाश्रयवशाद्गच्छेदन्यदन्यद्रसादिकम् ॥”
इति राजनिर्घण्टः ॥

धारः, पुं, (धार्य्यते इति । धृ+णिच्+घञ् ।) ग्रावान्तरम् । ऋणम् । इति मेदिनी । रे, ५१ ॥ जलधरासारवर्षणम् । इति हेमचन्द्रः ॥ प्रान्तः । गम्भीरः । इति शब्दरत्नावली ॥

धारकः, पुं, (धरति जलादिकमिति । धृ+ण्वुल् ।) कलसः । तस्योत्पत्त्यादि यथा,—
ब्रह्मोवाच ।
“उत्पत्तिं लक्षणं मानं कथयामि महामुने ! ।
धारकाः कलसाश्चैव येन लोके प्रकीर्त्तिताः ॥
अमृते मथ्यमाने तु सर्व्वदेवैः सदानवैः ।
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥
उत्पन्नममृतं तत्र महावीर्य्यपराक्रमम् ।
तस्याधारणार्थाय कलसः परिकीर्त्तितः ॥